CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Almira 3
shelf 3
28

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

1. Vishnu Sahasranama
2. Narayanopanishat
3. Aneka Sangraha Padya
4. Devi Sukata Apamarjana
5. Gayatri Hridaya
6. Pandava Gita 1844
7. Aditya Hridaya Stotra

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Public Domain. Digitization by eGangotri.Fundi

ह

४३२० [illegible]

४३२१ ना. उ.

४३२२ अने. पधा.

४३२३ देवीसू.

४३२४ अपना.

४३२५ आ. दृ.

४३२६ पा. गी.

४३२७ गा. दृ.

l Sanskrit University, Balmeeki Campus, Kathm

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विष्णु सहस्र नाम
प्रारभ्यते।

नं० 4320

लि० व्यास:।

विष्णुसहस्रनाम

विष्णुसहस्रनाम

श्री ५ को सरकार
राष्ट्रीय संग्रह अभिलेखालय

श्री ५ को सरकार
राष्ट्रीय संग्रह अभिलेखालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विस श्रीगणेशाय नमः ॥ ॐ नमो भगवते वासुदेवाय ॥ वैशम्पायन उवाच ॥ यस्य
१ स्मरणमात्रेण जन्मसंसारबन्धनात् ॥ विमुच्यते नमस्तस्मै विष्णवे प्रभ
विष्णवे ॥ १ ॥ वैशम्पायन उवाच ॥ श्रुत्वा धर्मानशेषेण पावनानि च सर्व
शः ॥ युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥ २ ॥ युधिष्ठिर उवा
च ॥ किमेकं दैवतं लोके किं वाप्येकं परायणम् ॥ स्तुवन्तः कं कमर्चन्तः
प्राप्नुयुर्मानवाः शुभम् ॥ ३ ॥ को धर्मः सर्वधर्माणां भवतः परमो मतः ॥ स्म
१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किञ्जपन्मुच्यतेजन्तुर्जन्मसंसारबन्धनात् ॥ श्रीभीष्मउवाच ॥ जगत्प्रभुंदे
वदेवमनन्तंपुरुषोत्तमम् ॥ स्तुवन्नामसहस्रेणपुरुषःसततोत्थितः ॥ ५ ॥
तमेवचार्चयन्नित्यम्भक्त्यापुरुषमव्ययम् ॥ ध्यायन्स्तुवन्नमस्यंश्चयजमा
नस्तमेवच ॥ अनादिनिधनंविष्णुंसर्वदुःखातिगोभवेत् ॥ ब्रह्मण्यंसर्व
धर्मज्ञंलोकानांकीर्तिवर्द्धनम् ॥ ७ ॥ लोकनाथंमहद्भूतंपृथग्भूतभवो
द्भवम् ॥ एषमेसर्वधर्माणांधर्मोधिकतमोमतः ॥ ८ ॥ यद्भक्त्यापुण्डरी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विस कासंलवैरेवैन्नरःसदा॥ परमंयोमहत्तेजःपरमंयोमहत्तपः॥८॥परमंयो
२ महद्ब्रह्मपरमंयःपरायणम्॥ पवित्राणांपवित्रंयोमङ्गलानांचमङ्गलं
म॥दैवतंदेवतानांचभूतानांयोव्ययःपिता॥यतःसर्वाणिभूतानिभवंत्या
दियुगागमे॥१०॥यस्मिंश्चप्रलयंयान्तिपुनरेवयुगक्षये॥तस्यलोकप्र
धानस्यजगन्नाथस्यभूपते॥११॥ऋषिर्नाम्नांसहस्रस्यवेदव्यासोम राम
हामुनिः॥छन्दोनुष्टुप्तथादेवोभगवान्देवकीसुतः॥१२॥अमृतांशूद्भवो २

श्रीजं शक्तिर्देवकिनन्दनः ॥ त्रिसामाहृदयं तस्य शान्त्यर्थे विनियुज्यते ॥१३॥ ॐ
अस्य श्रीविष्णोर्दिव्यसहस्रनामाख्यस्तोत्रमन्त्रस्य वेदव्यास ऋषिरनुष्टुप्छन्दो
श्रीकृष्ण श्रीवासुदेवो देवता अमृतांशूद्भवो भानुरिति बीजं देवकीनन्दन इति शक्तिः त्रिसामा
परमात्मा सामगः साम इति हृदयं [illegible] नन्दकी चक्रीति कीलकं ॐ उद्भवः क्षोभणो
देव इति मन्त्रः ॐ शार्ङ्गधन्वा गदाधर इत्यस्त्रम् ॐ त्रिसामा सामगः साम [illegible]
[illegible] भेषजं भिषक् ॥ श्रीविश्वं विष्णुर्वषट्कार इति [illegible] श्रीविष्णुप्रीत्यर्थे [illegible]

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विस
२

ष्णुसहस्रनामस्तोत्रपाठे विनियोगः ॥ ॐ विश्वं विष्णुर्वषट्कार इति अङ्गुष्ठा
भ्यां नमः ॐ अमृतांशूद्भवो भानुरिति तर्जनीभ्यां नमः ॐ ब्रह्मण्यो ब्र
ह्मकृद्ब्रह्मेति मध्यमाभ्यां नमः ॐ सुवर्णबिन्दुरक्षोभ्य इति अनामिकाभ्यां
नमः ॥ ॐ सुवर्णबिन्दुरक्षोभ्य इत्यनामिकाभ्यां नमः ॥ ॐ उदीर्णः सर्वतश्चक्षु
रिति कनिष्ठिकाभ्यां नमः ॐ शार्ङ्गधन्वा गदाधर इति करतलकरपृष्ठाभ्यां
नमः ॥ ॐ विश्वं विष्णुर्वषट्कार इति हृदयाय नमः ॥ ॐ अमृतांशूद्भवो

राम
३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रितिशिरसेस्वाहा ॐ ब्रह्मणपो ब्रह्मण्कृद्व सेनि शिखायैवषट् ॐ सुवर्णावि
३ वि दुरक्षाभ्यः कवचायहुं ॐ उदाराः सवुनः चक्षुरिति नेत्रत्रयायवौषट्।
ॐ शार्ङ्गधन्वा गदाधृ इत्यस्त्रायफट् ॐ मनुः सुदर्शनः काल इति दिग्बन्धः
॥ पूर्वे नारायणः पातु वारिजाक्षस्तु दक्षिणे ॥ प्रद्युम्नः पश्चिमे पातु वासुदे
वः स्तथोत्तरे ॥१॥ ईशान्यां वामनः पातु तथाग्नेय्यां जनार्दनः ॥ नैरृत्यां प
द्मनाभस्तु वायव्यां मधुसूदनः ॥२॥ ऊर्द्धुं गोवर्द्धनो रक्षेद्धरायां च त्रिविक्रमः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतेभ्यइतिपमान्शिष्यते

विम ॥एतेभ्योदशदिग्भ्यश्च सर्वतः पातु केशवः॥३॥ एवं न्यासविधिं कृत्वा साक्षा
४ न्नारायणो भवेत्॥ अथ ध्यानम्॥ उद्यत्कोटिदिवाकराभमनिशं शंखं रथारिं कौ
मोदकीं पद्मं विभ्रतमिन्दिरावसुमतीसंशोभिपार्श्वद्वयम्॥ कोटीराङ्गदहा
रकुण्डलधरं पीताम्बरं कौस्तुभोद्दीप्तं विश्वधरं स्ववक्षसि लसच्छ्रीवत्सचि व
ह्नं भजे॥१॥ विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम्॥ अनेकरूपदैत्या
न्तं नमामि पुरुषोत्तमम्॥२॥ क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकते राम
४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मौक्तिकानाम्मालाकृत्प्रासनस्थस्फटिकमणिनिभैर्मौक्तिकैर्मण्डिताङ्गः॥ शु
भ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्तपीयूषवर्षैरानन्दीनः पुनीयादरिन
लिनगदाशङ्खपाणिर्मुकुन्दः॥ भूः पादौ यस्य खंचोदरमसुरानिलश्चन्द्र
सूर्यौ च नेत्रे कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वाहुसुरेशः॥
अन्तस्थं यस्य विश्वं सुरनरखगभूभोगिगन्धर्वदैत्यैश्चित्रं ररम्यते जः
त्रिभुवन[redacted]पुषो विष्णुमीशन्नमामि॥४॥ शान्ताकारम्भुजगशय

वि स नम्पद्मनाभंसुरेशम्विश्वाधारङ्गगनशदृशम्मेघवर्णंशुभाङ्गम् ॥ लक्ष्मीका-
५ न्तङ्कमलनयनंयोगिभिर्ध्यानगम्यंवन्देविष्णुम्भवभयहरंसर्व्वलोके
कनाथम् ॥ ५ ॥ ॐ विश्वंविष्णुर्वषट्कारोभूतभव्यभवत्प्रभुः ॥ भूतकृत्भूत
भृद्भावोभूतात्माभूतभावनः ॥ १ ॥ पूतात्मापरमात्माचमुक्तानाम्परमा
गतिः ॥ अव्ययःपुरुषःसाक्षीक्षेत्रज्ञोक्षरएवच ॥ २ ॥ योगोयोगविदां
नेताप्रधानपुरुषेश्वरः ॥ नारसिंहवपुःश्रीमान्केशवःपुरुषोत्तमः ॥ ३ ॥ राम
५

सर्वः सर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ॥ सम्भवो भावनो भर्ता प्रभवः प्रभु
रीश्वरः ॥४॥ स्वयम्भूः शम्भुरादित्यः पुष्कराक्षो महास्वनः ॥ भगवान्भगहानन्दी
वनमाली हलायुधः ॥५॥ आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिशक्तिमान् ॥
अनादिनिधनो धाता विधाता धातुरुत्तमः ॥५॥ अप्रमेयो हृषीकेशः पद्म
नाभोमरप्रभुः ॥ विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥६॥ अग्राह्यः
शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ॥ प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥७॥ ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ॥ हिरण्यगर्भो भूगर्भो
माधवो मधुसूदनः ॥८॥ ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ॥ अ
नुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥९॥ सुरेशः शरणं शर्म विश्वरे
ताः प्रजाभवः ॥ अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥१०॥ अजः स
र्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ॥ वृषाकपिरमेयात्मा सर्वयोगवि
निसृतः ॥११॥ वसुर्वसुमनाः सत्यः समात्मा संमितः समः ॥१२॥ अमोघः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुण्डरीकाक्षो वृषकर्म्मा वृषोदरः ॥१२॥ रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचि
श्रवाः ॥ अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः ॥१३॥ सर्वगः सर्वविद्भा
नुर्विष्वक्सेनो जनार्दनः ॥ वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः ॥१४॥
लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ॥ चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्च २ हत्मा
तुर्भुजः ॥१५॥ भ्राजिष्णुर्भोजनम्भोक्ता सहिष्णुर्जगदादिजः ॥ अनघो विज
यो जेता विश्वयोनिः पुनर्वसुः ॥१६॥ उपेन्द्रो वामनः प्रांशुरमोघः शुचिरू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विस
७ र्जितः॥अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः॥१७॥वेद्यो वैद्यः
सदा योगी वीरहा माधवो मधुः॥अतीन्द्रियो महामायो महोत्साहो महा
॥१८॥ बलः महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः॥[illegible]र्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक्। महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः॥अ
निरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः॥२०॥मरीचिर्दमनो हंसः सुपर्णो
भुजगोत्तमः॥हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः॥२१॥अमृत्युः राम
७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वदृक्सिंहः संधाता संधिमाँ स्थिरः ॥ अजो दुर्मर्षणः शास्ता विश्रुतात्मास
रारिहा ॥ २२ ॥ गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ॥ निमिषोऽनिमिषः
स्रग्वी वाचस्पतिरुदारधीः ॥ २३ ॥ अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता स
मीरणः ॥ सहस्रमूर्द्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥ २४ ॥ आवर्तनो नि
वृत्तात्मा संवृतः संप्रमर्दनः ॥ अहः संवर्त्तको वह्निरनिलो धरणीधरः ॥ २
५ ॥ सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ॥ सत्कर्ता सत्कृतः साधुर्जह्नु

भार्गव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नारायणोनरः॥२६॥असंख्येयोप्रमेयात्माविशिष्टःशिष्टकृच्छुचिः॥सिद्धा
र्थःसिद्धसङ्कल्पःसिद्धिदःसिद्धिसाधनः॥२७॥वृषाहीवृषभोविष्णु
र्वृषपर्वावृषोदरः॥वर्द्धनोवर्द्धमानश्चविविक्तःश्रुतिसागरः॥२८॥सुभु
जोदुर्धरोवाग्मीमहेन्द्रोवसुदोवसुः॥नैकरूपोबृहद्रूपःशिपिविप्रका ष्टः
शनः॥२९॥ओजस्तेजोद्युतिधरःप्रकाशात्माप्रतापनः॥ऋद्धस्पष्टाक्षरो
मन्त्रश्चन्द्रांशुर्भास्करद्युतिः॥३०॥अमृतांशूद्भवोभानुःशशबिन्दुःसु
रेश्वरः॥औषधंजगतःसेतुःसत्यधर्मपराक्रमः॥३१॥भूतभव्यभवन्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थः पवनः पावनोनलः ॥ कामहा कामकृत्कांतः कामः कामप्रदः प्रभुः ॥ ३२
॥ युगादिकृद्युगावर्त्तो नैकमायो महाशनः ॥ अदृश्यो व्यक्तरूपश्च सहस्र
जिदनन्तजित् ॥ ३३ ॥ इष्टोविशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः
॥ क्रोधहा क्रोधकृत्कर्त्ता विश्वबाहुर्महीधरः ॥ ३४ ॥ अच्युतः प्रथितः प्रा
णः प्राणदो वासवानुजः ॥ अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥
॥ ३५ ॥ स्कन्दः स्कन्दधरो धुर्य्यो वरदो वायुवाहनः ॥ वासुदेवो बृहद्भानुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विस गादिदेवः पुरन्दरः ॥२६॥ अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ॥ वि
१ जितात्माभिधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥२७॥ अनुकूलः शतावर्त्तः
पद्मी पद्मनिभेक्षणः ॥२७॥ पद्मनाभोरविन्दाक्षः पद्मगर्भः शरीरभृत्
॥ महर्द्धिरृद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥२८॥ अतुलः शरभो भीमः
समयज्ञो हविर्हरिः ॥ सर्वलक्षणलक्षण्यो लक्ष्मीवान्समितिञ्जयः ॥२९
विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ॥ महीधरो महाभागो वेगवा राम
९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नामिताशनः ॥४०॥ उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ॥ करणं का
रणं कर्त्ता विकर्त्ता गहनो गुहः ॥४१॥ व्यवसायो व्यवस्थानः संस्थानः स्था
नदो ध्रुवः ॥ परर्द्धिः परमः स्पष्टः स्तुष्टः पुष्टः शुभेक्षणः ॥४२॥ रामो विरा
मो विरजो मार्गो नेयो नयो नयः ॥ वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदु
त्तमः ॥४३॥ वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ॥ हिरण्यगर्भः
शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥४४॥ ऋतुः सुदर्शनः कालः परमेष्ठी

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विस परिग्रहः ॥ उग्रः सम्वत्सरोदक्षो विश्रामो विश्वदक्षिणः ॥ ४५ ॥ विस्तारः स्था
१० वरः स्थाणु प्रमाणं बीजमव्ययम् ॥ अर्थोनर्थो महाकोशो महाभोगो म
हाधनः ॥ ४६ ॥ अनिर्विण्णः स्थविष्टो भूर्धर्मयूपो महामखः ॥ नक्षत्रनेमि
नक्षत्री क्षमः क्षामः समीहनः ॥ ४७ ॥ यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां ग
तिः ॥ सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥ ४८ ॥ सुव्रतः सुमुखः सू
क्ष्मः सुघोषः सुन्दरः सुहृत् ॥ मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥ ४९ राम
१०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ॥ वत्सरो वत्सलो वत्सीर
त्नगर्भो धनेश्वरः ॥५०॥ धर्मगुप्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ॥५१
॥ अविज्ञातः सहस्रांशुर्विधाता कृतलक्षणः ॥५१॥ गभस्तिनेमिस
त्वस्थः सिंहो भूतमहेश्वरः ॥ आदिदेवो महादेवभृद्गुरुः ॥५२॥ उत्त देवेशो
रो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ॥ शरीरभूतभृद्भोक्ता कपीन्द्रो
भूरिदक्षिणः ॥५३॥ सोमपामृतपः सोमः पुरुसत्तमः ॥ विजयो ज
रुजित्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यःसत्यसन्धो दाशार्हः सात्वतां पतिः ॥ ५४ ॥ जीवो विनयिता साक्षी मु
कुन्दोमितविक्रमः ॥ अम्भोनिधिरनन्तात्मा महोदधिशयोन्तकः ॥ ५५ ॥
अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ॥ आनन्दो नन्दनो नन्दः स
त्यधर्मा त्रिविक्रमः ॥ ५६ ॥ महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः
॥ त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ॥ ५७ ॥ महावराहो गोवि
न्दः सुषेणः कनकाङ्गदी ॥ गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ ५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेधाःस्वाङ्गोजितःकृष्णोदृढःसङ्कर्षणोच्युतः ॥ वरुणोवारुणोवृक्षःपुष्क
राक्षोमहामनः ॥५९॥ भगवान्भगहानन्दीवनमालीहलायुधः ॥ आदि
त्योज्योतिरादित्यःसहिष्णुर्गतिसत्तमः ॥६०॥ सुधन्वाखण्डपरशुर्दारु
णोद्रविणप्रदः ॥ दिवःस्पृक्सर्वदृग्व्यासोवाचस्पतिरयोनिजः ॥६१
॥ त्रिसामासामगःसामनिर्वाणंभेषजम्भिषक ॥ संन्यासकृच्छमः
शान्तोनिष्ठाशान्तिःपरायणः ॥६२॥ शुभाङ्गःशान्तिदःस्रष्टाकुमुदः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वि स कुवलेशयः॥गोहितोगोपतिर्गोप्ता वृषभाक्षो वृषप्रियः॥६३॥अनिवर्त्ती
१२ निवृत्तात्मासंक्षेप्तासेमकृद्छिवः॥श्रीवत्सवक्षाःश्रीवासःश्रीपतिःश्रीमतां
वरः॥६४॥श्रीदःश्रीशःश्रीनिवासःश्रीनिधिःश्रीविभावनः॥श्रीधरः
श्रीकरःश्रेयःश्रीमांल्लोकत्रयाश्रयः॥६५॥स्वक्षःस्वङ्गःशतानन्दोनन्दि
र्ज्योतिर्गणेश्वरः॥विजितात्माविधेयात्मासत्कीर्त्तिश्छिन्नसंशयः॥
६६॥उदीर्णःसर्वतश्चक्षुरनीशःशाश्वतःस्थिरः॥भूशयोभूषणोभू रा म
१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निर्विशोकःशोकनाशनः॥६७॥अर्चिष्मानर्चितःकुम्भोविशुद्धात्मा
विशोधनः॥अनिरुद्धोप्रतिरथःप्रद्युम्नोमितविक्रमः॥६८॥कालने
मिनिहावीरःशौरिःशूरजनेश्वरः॥त्रिलोकात्मात्रिलोकेशःकेशवःके
शिहाहरिः॥६९॥कामदेवःकामपालःकामीकान्तःकृतागमः॥अनि
र्देश्यवपुर्विष्णुर्वीरोनन्तोधनंजयः॥७०॥ब्रह्मण्योब्रह्मकृद्ब्रह्माब्र
ह्मब्रह्मविवर्द्धनः॥ब्रह्मविद्ब्राह्मणोब्रह्मीब्रह्मज्ञोब्राह्मणप्रियः॥७१॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विस महाक्रमोमहाकर्मामहातेजामहोरगः॥महाक्रतुर्महायज्वामहायज्ञो
१३ महाहविः॥७२॥स्तव्यस्तवप्रियस्तोत्रंस्तुतिस्तोतारणप्रियः॥पूर्णःपू
रयितापुण्यःपुण्यकीर्तिरनामयः॥७३॥मनोजवस्तीर्थकरोवसुरेतो
वसुप्रदः॥वसुप्रदोवासुदेवोवसुर्वसुमनाहविः॥७४॥सद्गतिःसत्कृ
तिःसत्तासद्भूतिःसत्परायणः॥शूरसेनोयदुश्रेष्ठःसन्निवा
सःसुयामुनः॥७५॥भूतावासोवासुदेवःसर्वासुनिलयोनलः॥दर्प राम १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हा दर्पदो दृप्तो दुर्द्धरोथापराजितः ॥७६॥ विश्वमूर्तिर्महामूर्तिर्दीप्तमू
र्तिरमूर्तिमान् ॥ अनेकमूर्तिरव्यक्तः शतमूर्तिः शतानन: ॥७७॥ एको नै
कः श्रवः कः किंयत्तत्पदमनुत्तमम् ॥ लोकबंधुर्लोकनाथो माधवो भक्त
वत्सलः ॥७८॥ सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ॥ वीरहा वि
षमः शून्यो घृताशीरचलश्चलः ॥७९॥ अमानी मानदो मान्यो लोक
स्वामी त्रिलोकधृक् ॥ सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥८०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेजोवृषो द्युतिधरः सर्वशस्त्रभृतांवरः॥प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो
गदाग्रजः॥८१॥चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः॥चतुरात्मा चतुर्भा
वश्चतुर्वेदविदेकपात्॥८२॥समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः॥दु
र्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा॥८३॥शुभाङ्गो लोकसारङ्गः सुतन्तुस्त
कृतकर्मा न्तुवर्द्धनः॥इन्द्रकर्मा महाकर्मा कृतागमः॥८४॥उद्भवः सुन्दरः सुन्दो रत्नना
भः सुलोचनः॥अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी॥८५॥सुवर्ण

कृतकर्मा २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ॥ महाह्रदो महागर्त्तो महाभूतो महानि
धिः ॥ ८६ ॥ कुमुदः कुन्दरः कुन्दः पर्जन्यः पवनोनलः ॥ अमृतांशोमृतव
पुः सर्वज्ञो सर्वतोमुखः ॥ ८७ ॥ सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुताप
नः ॥ न्यग्रोधोदुम्बरोश्वत्थश्चाणूरान्ध्रनिषूदनः ॥ ८८ ॥ सहस्रार्चिः सप्त
जिह्वः सप्तैधाः सप्तवाहनः ॥ अमूर्तिरनघोचिन्त्यो भयकृद्भयनाशनः ॥
८९ ॥ अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ॥ अधृतः स्वधृतः स्वा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विस स्यःप्राग्वंशोवंशवर्द्धनः॥९०॥भारभृत्कथितोयोगीयोगीशःसर्वकामदः।
१५ ॥आश्रमःश्रमणःक्षामःसुपर्णोवायुवाहनः॥९१॥धनुर्धरोधनुर्वेदो
दण्डोदमयितादमः॥अपराजितःसर्वसहोनियन्तानियमोयमः॥९२
सत्ववान्सात्विकःसत्यःसत्यधर्मपरायणः॥अभिप्रायःप्रियार्होर्हःप्रिय
कृत्प्रीतिवर्द्धनः॥९३॥विहायसगतिर्ज्योतिःसुरुचिर्हुतभुग्विभुः॥रवि
विरोचनःसूर्य्यःसविताविलोचनः॥९४॥अनन्तोहुतभुग्भोक्तासुख राम
१५

दोनैकदोग्रजः॥अनिर्विण्णःसदामर्षीलोकाधिष्ठानमद्भुतम्॥९५॥स
नात्सनातनतमःकपिलःकपिरव्ययः॥स्वस्तिदःस्वस्तिकृत्स्वस्तिस्वस्ति
भुक्स्वस्तिदक्षिणः॥९६॥अरौद्रःकुण्डलीचक्रीविक्रम्यूर्जितशास
नः॥शब्दातिगःशब्दसहःशिशिरःशर्वरीकरः॥९७॥अक्रूरःपेशलो
दक्षोदक्षिणःक्षमिणांवरः॥विद्वत्तमोवीतभयःपुण्यश्रवणकी
र्त्तनः॥९८॥उत्तारणोदुष्कृतिहापुण्योदुःस्वप्ननाशनः॥वीरहारक्षः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वि स णाञ्छान्तो जीवनः पर्यवस्थितः ॥९९॥ अनन्तरूपो नन्तश्रीर्जितमन्युर्भ
१६ यापहः ॥ चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥१००॥ अना
दिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ॥ जननो जनजन्मादिर्भीमो
भीमपराक्रमः ॥१०१॥ आधारनिलयो धाता पुष्पहासः प्रजागरः ॥
ऊर्द्धगः सत्पथाचारः ॥ प्राणदः प्रणवः पणः ॥१०२॥ प्रमाणं प्राणनि
लयः प्राणभृत्प्राणजीवनः ॥ तत्वं तत्वविदेकात्मा जन्ममृत्युजराग राम १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति:॥१०३॥भूर्भुवःस्वस्तरुस्तारःसविताप्रपितामहः॥यज्ञोयज्ञ
पतिर्यज्वाययज्ञाङ्गोयज्ञवाहनः॥१०४॥यज्ञभृद्यज्ञकृद्यज्ञीयज्ञभुग्यज्ञ
साधनः॥यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नादमेवच॥१०५॥आत्मयो
निःस्वयंजातोवैखानःसामगायनः॥देवकीनन्दनःस्रष्टाक्षितीशः
पापनाशनः॥१०६॥शङ्खभृन्नन्दकीचक्रीशार्ङ्गधन्वागदाधरः॥
रथाङ्गपाणिरक्षोभ्यःसर्वप्रहरणायुधः॥१०७॥ॐ॥इतिदक्षि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विस र्तनीयस्य केशवस्य महात्मनः ॥ नाम्नां सहस्रं दिव्यानामशेषेण प्रकी
१७ र्तितम् ॥ १ ॥ य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ॥ नाशुभं प्रा
प्नुयात्किंचित्सोमुत्रेह च मानवः ॥ २ ॥ वेदान्तगो ब्राह्मणः स्यात्क्षत्रि
यो विजयी भवेत् ॥ वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ॥
३ ॥ धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ॥ कामानवाप्नुया
त्कामी प्रजार्थी प्राप्नुयात्प्रजाः ॥ ४ ॥ भक्तिमान्यः सदोत्थाय शुचिस्तद् राम १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तमानसः॥सहस्रंवासुदेवस्यनाम्नामेतत्प्रकीर्तयेत्॥५॥यशःप्रा
प्नोतिविपुलंज्ञातिप्राधान्यमेवच॥अचलांश्रियमाप्नोतिश्रेयः
प्राप्नोत्यनुत्तमम्॥६॥नभयंक्वचिदाप्नोतिवीर्यंतेजश्चविन्दति
॥भवत्यरोगीद्युतिमान्बलरूपगुणान्वितः॥७॥रोगार्त्तोमुच्यते
रोगाद्बद्धोमुच्येतबन्धनात्॥भयान्मुच्येतभीतस्तुमुच्येदापन्न
आपदः॥८॥दुर्गाण्यतितरत्याशुःपुरुषःपुरुषोत्तमम्॥९॥स्तु

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विस न्नामसहस्रेणनित्यम्भक्तिसमन्वितः॥९॥ वासुदेवाश्रयोमर्त्यौवा
१८ सुदेवपरायणः॥ सर्वपापविशुद्धात्मायानिब्रह्मसनातनम्॥१०॥
नवासुदेवभक्तानामशुभंविद्यतेक्वचित्॥ जन्ममृत्युजराव्याधिभ
यन्नैवोपजायते॥११॥ इमंस्तवमधीयानः श्रद्धाभक्तिसमन्वितः॥
युज्येतात्मासुखक्षांतिश्रीधृतिस्मृतिकीर्तिभिः॥१२॥ नक्रोधोनचमा
त्सर्यंन्नलोभोनाशुभागतिः॥ भवन्तिकृतपुण्यानांभक्तानांपुरुषो राम १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमे ॥१३॥ द्यौःसचन्द्रार्कनक्षत्रखंदिशोभूर्महोदधिः॥ वासुदेवस्यवी
र्येणाविधृतानिमहात्मनः॥१४॥ ससुरासुरगान्धर्वसयक्षोरगराक्षस
म्॥ जगद्वशेवर्त्ततेदंकृष्णस्यसचराचरम्॥१५॥ इन्द्रियाणिमनोबु
द्धिःसत्वंतेजोबलंधृतिः॥ वासुदेवात्मकान्याहुःक्षेत्रंक्षेत्रज्ञमेवच
॥१६॥ सर्वागमानामाचारःप्रथमंपरिकल्प्यते॥ आचारप्रभवोध
र्मोधर्मस्यप्रभुरच्युतः॥१७॥ ऋषयःपितरोदेवामहाभूतानिधातवः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि स ॥ जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् ॥१८॥ योगो ज्ञानं तथा सां
९ ख्यं विद्याः शिल्पादि कर्म च ॥ वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्द
नम्पृथग्भूतात् ॥१९॥ एको विष्णुर्महद्भूतान्यनेकशः ॥ त्रींल्लोकान्व्याप्य भूता
त्मा भुंक्ते विश्वभुगव्ययः ॥२०॥ इमं स्तवं भगवतो विष्णोर्व्यासेन की
र्तितम् ॥ पठेद्य इच्छेच्छृणुयाच्छ्रेयः प्राप्तुं सुखानि च ॥२१॥ विश्वेश्व
रमजं देवं जगतः प्रभवाप्ययम् ॥ भजन्ति ये पुष्कराक्षं न ते यान्ति प राम ९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रामवम् ॥२२॥ अर्जुनउवाच ॥ पद्मपत्रविशालाक्षपद्मनाभसुरो
त्तम ॥ भक्तानामनुरक्तानान्त्राताभवजनार्दन ॥२३॥ श्रीभगवानु
वाच ॥ योमान्नामसहस्रेणस्तोतुमिच्छतिपाण्डव ॥ सोहमेकेन
श्लोकेनस्तुतएवनसंशयः ॥२४॥ नमोस्त्वनन्तायसहस्रमूर्तयेस
हस्रपादाक्षिशिरोरुवाहवे ॥ सहस्रनाम्नेपुरुषायशाश्वतेसह
स्रकोटीयुगधारिणेनमः ॥२५॥ नमोब्रह्मण्यदेवायगोब्राह्मण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विस हितायच ॥ जगद्धितायकृष्णायगोविन्दायनमोनमः ॥ २५ ॥ वासना
२० द्वासुदेवस्यवासितम्भुवनत्रयम् ॥ सर्वभूतनिवासोसिवासुदेवन
मोस्तुते ॥ २६ ॥ आकाशात्पतितन्तोयंयथागच्छतिसागरे ॥ सर्वदेव
नमस्कारःकेशवम्प्रतिगच्छति ॥ २७ ॥ एषानिष्कण्टकःपन्थायत्रसम्पू
ज्यतेहरिः ॥ कुपथन्तंहिजानीयाद्गोविन्दरहितागमम् ॥ २८ ॥ सर्व
देवेषुयत्पुण्यंसर्वतीर्थेषुयत्फलम् ॥ तत्फलंसमवाप्नोतिस्तुत्वा राम
२०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वि स देवजनार्दनम् ॥ ॥ॐ तत्सत् इति श्री महाभारते शतसहस्र्यांसंहि
२१ तायांवैयासिक्यामनुशासनपर्वणि दानधर्मे भीष्मयुधिष्ठिर
सम्वादे श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रं समाप्तं शुभम् ॥ ० ॥ ० ॥
यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ॥ तत्सर्वं क्षम्यतां देव प्र
सीद परमेश्वर ॥ १ ॥ ॥ ॥ ॥ ॥

राम
२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विष्णुसहस्रनाम समाप्तम्

नं० ४३२०

ले० व्यास:

श्री ५ को सरकार

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नारायणोपनिषद्

अपौरुषेया।

नं० ४३२१

श्री ५ को सरकार
वाल्मीकि संस्कृत महाविद्यालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२× नारायणपरंब्रह्म तत्त्वं नारायणः परम्॥ नारायणः परो ध्याता ध्यानं नारायणः परम्॥२

ना॰पू॰ १

श्रीगणेशायनमः॥ ॥ॐ नमः शिवाय॥ ॥सहस्रशीर्षंदेवंवि-
श्वाख्यंविश्वसंभवम्॥ विश्वंनारायणंदेवमक्षरंपरमंपदम्॥१॥ विश्व
तः परमान्नित्यंविश्वंनारायणंहरिम्॥ विश्वमेवेदंपुरुषस्तद्विश्वमु
पजीवति॥२॥ पतिंविश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्
॥ नारायणंमहाज्ञेयंविश्वात्मानंपरायणम्॥३॥ नारायणपरं
ज्योतिरात्मानारायणः परः॥ यच्चकिंचिज्जगत्सर्वंदृश्यतेश्रूय
तेऽपिवा॥४॥ अन्तर्बहिश्चतत्सर्वंव्याप्यनारायणः स्थितः॥ अनन्तं

श्रीः १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तमव्ययंकविं समेत्रनविश्वसंभुवम्॥५॥पद्मकोशप्रतीकाशं
हृदयंचाप्यधोमुखम्॥ अधोनिष्ठ्यावितस्त्यन्तेनाभ्यामुपरितिष्ठ
ति॥ ज्वालमालाकुलंभातिविश्वस्यायतनंमहत्॥ सन्ततं
शिलाभिस्तुलंबत्याकोशसन्निभम्॥७॥ तस्यान्तेसुषिरं सू
क्ष्मंतस्मिन्सर्वंप्रतिष्ठितम्॥८॥ तस्यमध्येमहानग्निर्विश्वार्चिर्वि
श्वतोमुखः॥ सोग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः॥ तिर्यगू
र्ध्वमधःशायीरश्मयः तस्यसंततः॥९॥ सन्तापयतिस्वंदेहमापादमस्तकः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लमस्तकः ।। तस्यमध्येवह्निशिखाग्राणीयोर्ध्वाव्यवस्थिता ।।१०।।
नीलतोयदमध्यस्थाविद्युल्लेखेवभास्वरा । नीवाऽशूकवत्तन्वीपी
ताभास्वत्यणूपमा ।।११।। तस्याःशिखायामध्येतपरमात्माव्यवस्थि
तः । सब्रह्मा । सशिवः सहरिः सेन्द्रः सोऽक्षरः परमः स्वराट् । ॐ तद्ब्रह्म ः
ॐ तद्वायुः ॐ तदात्मा । ॐ तत्सत्यं ॐ तत्सर्वम् ॐ तत्पुरोर्नमः । अन्तश्च
रतिभूतेषुगुहायांविश्वमूर्त्तिषु । त्वंयज्ञस्त्वंवषट्कारस्त्वमिन्द्रस्त्वं
रुद्रस्त्वंविष्णुस्त्वंब्रह्मत्वंप्रजापतिस्त्वंतदापआपोज्योतीरसोऽमृतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पंचाक्षराणिएतद्वैनारायणस्याष्टाक्षरम्·पदंयोहवैनारायणस्या
ष्टाक्षरंपदमध्येत्यनब्रुवन्·सर्वमायुरेतिविन्दते·प्राजापत्यं·रायः
स्पोषंगौपत्यंततोमृतत्वमश्नुते·ततोमृतत्वमश्नुतइति·प्रत्यगा
नन्दंब्रह्मपुरुषंप्रणवस्वरूपं·अकारउकारोमकारइतितानेक
धा·समभवत्तदेतदोमिति·यदुक्त्वामुच्यतेयोगीजन्मसंसारबंध
नात्·ॐनमोनारायणायेतिमंत्रोपासकोवैकुण्ठभुवनंगमिष्य
ति·तदिदंपरंपुण्डरीकंविज्ञानघनंतस्मात्तडिदाभामात्रं·ब्रह्म

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ना·प· ण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदन इति· सर्वभूतस्थमेकं नारायणं·
३ कारणरूपं परं ब्रह्म· ॐ अथर्वणशिरो योधीते प्रातरधीयानो रात्रि·
कृतं पापं नाशयति· सायमधीयानो दिवसकृतं पापं नाशयति·
सायंप्रातः प्रयुञ्जानो पापोऽपापो भवति· माध्यन्दिनमादित्या
भिमुखोधीयानः पंचमहापातकोपपातकात्प्रमुच्यते· स सर्ववेद
पारायणपुण्यं लभते नारायणसायुज्यमाप्नोति य एवं वेद॥ ॥ श्रीः
इति श्रीनारायणोपनिषत्समाप्तम्॥ ॥शुभमस्तु॥ हरिः॥ ३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ना॰उ॰ १ श्रीगणेशायनमः॥ ॥ॐनमोभगवतेवासुदेवाय॥ ॥ॐअथपु
रुषोहवैनारायणोकामयतः प्रजाःसृजेयेति। नारायणात्प्राणो
जायतेमनःसर्वेन्द्रियाणिचखंवायुर्ज्योतिरापःपृथ्वीविश्वस्य
धारिणीनारायणाद्ब्रह्माजायतेनारायणाद्रुद्रोजायतेनाराय
णात्प्रजापतिःप्रजायतेनारायणादिन्द्रोजायतेनारायणाद
ष्टौवसवोनारायणादेकादशरुद्राजायन्ते।नारायणाद्द्वादशादित्याः श्रीः
सर्वादेवताःसर्वऋषयःसर्वाणिछन्दांसि।सर्वाणिभूतानिना॰ १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रायणाद्देवसमुत्पद्यन्ते नारायणात्प्रव र्तन्ते नारायणेप्रलीयन्ते ·
अथनित्योदेवएकोनारायणोब्रह्माचनारायणः शिवश्चनारायणः
शक्रश्चनारायणोवसवोश्विनौचनारायणोद्वादशादित्याश्चनारा
यणः सर्वेऋषयश्चनारायणः कालश्चनारायणोदिशश्चनाराय
णोधश्चनारायणऊर्ध्वश्चनारायणोमूर्तामूर्तश्चनारायणोन्तर्वहि
श्चनारायणो नारायणएवेदंसर्वंयद्भूतंयच्चभाव्यम् · अथनित्योनि
ष्कलंकोनिराख्यातोनिरंजनः शुद्धोदेवएकोनारायणोनद्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ना०प०
२

तीयोस्तिकश्चिद्यएवंवेद·सविह्नुरेवभवतिसविह्नुरेवभवति·बुद्धिं
समारुथींकृत्वामनःप्रग्रहवानृषुमान·प्रयातिपरमंपारंविश्वारव्य
पदमित्ययनहिनारायणस्योपनिषदमधीतेससर्वेभ्यःपापेभ्योवि
मुक्तोभवति·ससर्वेभ्योघोरेभ्योविमुक्तोभवति·सर्वान्कामान
वाप्नोति·ससर्वांश्चलोकानवाप्नोति·ब्रह्मत्वंचगत्वामृतत्वंचग
च्छति·ॐमित्येकाक्षरंतदग्रेव्याहरन्नमइति·पश्चान्नारायणाये श्रीः
त्युपरिष्टात्·ॐमित्येहाक्षरन्नमःइति·ह्यक्षरेनारायणायेति· २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूः ॐ भुवः स्वरोम्·राजा·धिराजाय प्रसह्यसाहिने नमो वयंवैश्रवणा
यकुर्म्महे·समेकामान्कामकामायमह्यंकामेश्वरोवैश्रवणोददातु·
कुवेरायवैश्रवणायमहाराजायवैनमः तद्विष्णोः परमंपदं·सदापश्य
न्तिसूरयः दिवीवचक्षुराततम्·त्रीणिपदाविचक्रमेविष्णुर्गोपाःअ
दाभ्यः अतोधर्माणिधारयन्·तद्विप्रासोविपन्यवोजागृवांसः स
मिन्धते·विष्णोर्य्यत्परमंपदम्·विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतो
बाहुरुतविश्वतस्पात्·सम्बाहुभ्यान्धमतिसंपतत्रैर्द्यावाभूमीजनय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ना॰प॰ नैवेऽएक॥ ॥इतिश्रीनारायणोपनिषद्समाप्तम्॥ ॥शुभम्॥

३

नं॰ ४३२१

श्री ५ को सरकार
वाल्मीकि संस्कृत पाठशाला

श्री ५ को सरकार
वाल्मीकि संस्कृत पाठशाला

श्रीः
३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनेक ग्रंथ एक थानि

अनेक ग्रंथ पथानि

नं० ४३२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीगणेशाय नमः॥ यस्मादासित्कुमारः कुवलयदल
वृन्दालयो द्वाहगंगां कामायस्यां गमंगापिहितजनवयो
पागवीशध्वजोपि॥ लंकेशाद्येकनाथोहिमकरहविभ्रद्
विशेषाश्वमोसौवर्णस्यावस्यलोपादपहृतहरिः पात
कंवःस्मरारिः॥१॥ इपामध्वेनाहरांगांगाजलधलिधरो
त्कुल्यपंकेरुहस्यामोमाक्षाविरूपेनारथवरगापा॥

॥गमः॥
॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाकोद्रुंकारगम्याः ॥ देवासिद्ध्यश्वनेत्राजगदवनसमुद्धे
द्दनोत्पत्तिदक्षाः प्रीतावः पान्तु नित्यं हरिहरविधयः लाक्ष्मी
गोहंमपत्रा ॥ १ ॥ कचर्के चकों वृत्वाग्रे पातिघुष्मा हृनेघु
प्रथमनलधिपुत्री सक्कमेऽनंगधात्रि ॥ त्रथितानि विड
नीवीवन्धनिमोक्षणार्थं चतुरधिककरास्तः पान्तुव
श्चक्रुपाति ॥ धाम्पम्मन्दरकन्दरोदरशीव्याहृतानि

Nepal Sanskrit University, Balmeeki Campus, Kathman

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वारिधिः कल्लोलैरलमाकुलं कलयतो लक्ष्म्या मुखांभोरुहं
औत्सुक्यात्तरलाः स्मराद्धि कलिता भीत्या समाकुंचिताः
क्रोधेनाज्ज्वलिता मदान्मुकुलिताः शौरेर्दृशः पान्तु वः ॥१॥
किं गोत्रं किमु जीवनं किमु धनं का जन्मभूः के वयः किं चा
रित्रममुष्य के सहचराः के वंशजाः प्राकृताः ॥ का माता ॥रामः॥
जनकः शिवस्य क इति प्रह्वैरापृष्टः भूतापृष्टा सस्मि ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तन्नभ्रमूकवक्त्राः सप्तर्षयः पान्तु वः ॥ १ ॥ तातंनन्वाततनातं
कथयहांकुलं लंकृते संप्रश्ने नेत्युक्त्वा चंडमौलिर्नत
वदनकजो जातलज्जो बभूव ॥ एवमादीनदानीं श्रुत्वा
नहाकुलं वेदकं शेषकण्ठोर्ध्वा कंठानीलकण्ठः प्रह
सितवदनः पान्तु वश्चन्द्रचूडः ॥ १ ॥ गंगावारिभिरुक्षि
ताः फणिफणोत्कम्पजवातविद्धास्त्रैलोक्यरक्षिताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शितांशुकलयास्मेरैः केःपुष्पाश्रयः॥ आनंदाश्रुपरिप्लुता
क्षिपतु भक्तेषु मेघमिलद्दोहलाः नाल्पं कल्पलताफलं दद
तु वोः भागीरथी धूर्जटेः ॥१॥ मकरं येन रथो कृतं नयन
योः युग्मं रथाङ्गं किं कृतं पात्रत्वं रथ कर्मसारथि कृतं ब्रा
साम्बुरंगा कृताः॥ को दृष्टो कृतमात्मवीर्यमचिरान्मो रामः॥
वीकृतं भूपतां वामांगीशिविरवी कृतं दिशान्तु नः क्षेमं ॥२॥
सधन्वी उमानाथ ॥ १ ॥ भीतिनर्लिङ्गजं गङ्गार्यविना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रीतिर्नवचन्द्रामृतत्राशौ चंहिकपालदामलुलनास्त्रो वं
नगंगाजलानां ॥ नोहेगाग्निविनिभस्मनानवञ्जावं गौरि
लनालिंगनादास्मारामततयाहि नाहि तमसमः त्वस्थो
हापानुवः ॥१॥ विहितोश्चागमनंनिशाम्यसहसाकृ
त्ताफाणिडंगएं कोपीनंपारिधायचर्मकारिणाः
शंभुपरोधावति ॥ हष्टाविष्णुरथसकम्पहृदयः
सर्प्पोऽपनद्धतलेकृति विलवलिताहयाननमुखो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नम्रो हरः पातु वः ॥१॥ भस्मान्धोरगफूत्कृतिस्फुटभवज्वा
लस्यवैश्वानरः ज्वालाविलुप्तसुधांशुमण्डलगलत्पी
यूषधारारसे ॥ सृंजीवकृतचर्मगर्जितभयभ्राम्यद्
घाकर्षणव्याकुलः सहसाद्रिजोपहसितो लक्ष्मो हरः
पातु वः ॥१॥ कण्ठं भूलीमृगयापि पजं नीलकण्ठाश्री ॥ रामः ॥
यं हं केकामेकाक्रान्तपतिनेवहरेविषाणो ॥ श्यामाङ्ग ॥४१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्गुन्धेनवहतिनक्रजीवितेशः शिवायागच्छारणपप्राति
वचनजङः पातुवस्थंद्रचूडः ॥१॥ लोलेबुद्धिकपालि
कामिनीपिनाकल्लेपतिः पाथसाकप्रत्येति नला
दपत्वजननंप्रमेति यप्रलणना॥ इत्थंधर्वनाति भु
राजस्तुनयोराकर्णपवाकचातुरीसंसारस्पहरेहे
रस्पवप्रसोनिघ्नंनविघ्नतुवः ॥२॥ पोनोझंस्वक

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनेक ग्रंथ ६५ थान

नं. ४३२२

नेपाल सरकार

नवधः ६ इतिमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे दे

माहात्म्ये धूम्रलोचनवधः स्वस्ती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दे.सू.

२

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भूवा ॥ ॥ ॐ शांतिः ॐ शांतिः ॐ शांति ॥ इति श्रीभैरवोक्तं
देवीसूक्तं समाप्तम् ॥ ॥ ॥ ॥

इतिसम्वत् १८२५ सालमितिमाघवदि ६ रोज ३ पालेषे बोले
लिषितं उपमन्युगोत्रवत्स-नारायणसर्म्मेण लेषुक कस्य
लेषकामिति शुभम् ॥ ० ॥ ० ॥ ० ॥ ० ॥ ०

॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥

नं० ४३२३ देवीसूक्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

समिदंकृणोम्यहंद्यावापृथिवीआविवेश ॥६॥ अहं
षुवे पितरमस्य मूर्द्धन्मम योनिरप्स्वंतःसमुद्रे । त
तो वि तिष्ठे भुवनानि विश्वोतामूं द्यां वर्ष्मणोपस्पृशा
मि ॥७॥ अहमेव वात इव प्रवाम्यारभमाणा भुवनानि
विश्वा । परो दिवा पर एना पृथिव्यैतावती महिना सं ब

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यः प्राणिति य ईं शृणोत्युक्तं अमन्त्रवो मां त उप क्षयं
ति श्रुधि श्रुत श्रद्धिवं ते वदामि ।४। अहमेव स्वयमिदं
वदामि जुष्टं देवेभिरुत मानुषेभिः । यं कामं कामयते
तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधां ।५। अहं रुद्रा
य धनुरातनोमि ब्रह्मद्विषे शरवे हन्तवा उ अहं जनाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगं
अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सु
न्वते ॥ २ ॥ अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथ
मा यज्ञियानां ॥ तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रा
भूर्यावेशयंती ॥ ३ ॥ मया सो अन्नमत्ति यो विपश्यति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीगणेशाय नमः ॥ अथ देवीसूक्तं ॥ अस्य श्री देवी
सूक्तस्य वागांभृणी ऋषिस्त्रिष्टुप् छंदः आत्मा देवता स
प्तशतीसांगजासिद्धर्थे जपे वि नियोगः ॥ अहं रुद्रे
भिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ॥ अहं मि
त्रावरुणोभा बिभर्म्यहमिंद्राग्नी अहमश्विनोभा ॥१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋग्वेदोक्तं —

देवीसूक्तम् । नं०

४३२२

श्री ५ को सरकार
वाल्मीकि संस्कृत महाविद्यालय

श्री ५ को सरकार
वाल्मीकि संस्कृत महाविद्यालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नं. ४३२४

अपमार्जनम्

श्री ५ को सरकार
वाल्मीकि संस्कृत माध्यमिक...

श्री ५ को सरकार
वाल्मीकि संस्कृत माध्यमिक...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अपमार्जन
१

श्रीगणेशायनमः दाल्भ्यउवाच भगवन्प्राणिनः सर्वेविषरोगाद्युपद्रवैः दुष्टग्रहाभिघातैश्च
सर्वकालमुपद्रुताः आभिचारककृत्याभिः स्पर्शरोगैश्चदारुणैः सदासंपीड्यमानास्तु
तिष्ठन्तिमुनिसत्तमः येनकर्मविपाकेनविषरोगाद्युपद्रवाः नभवंतिनृणांतन्मेयथा
वद्वक्तुमर्हसि पुलस्त्यउवाच व्रतोपवासैर्यैर्विष्णुर्नान्यजन्मनितोषितः तेनरामु
निशार्दूलग्रहरोगादिभागिनः यैर्नतत्प्रवणंचित्तंसर्वदैवनरैःकृतम् विषज्वरग्रहा
णांतेमनुष्यादाल्भ्यभागिनः आरोग्यंपरमांऋद्धिंमनसायद्यदिच्छति तत्तदाप्नोत्य
सन्दिग्धंपरत्राप्युततोऽच्युतः नाधीन्नाप्नोतिनव्याधीन्नविषग्रहबन्धनम् कृत्यास्प
र्शभयंवापितोषितेमधुसूदने सर्वदुःखशमास्तस्यसौम्यास्तस्यसदाग्रहाः देवाना
मप्यधृष्योसौतुष्टोयस्यजनार्दनः यःसमःसर्वभूतेषुयथात्मनितथाहितेः उपवा
सादिनातेनतोषितेमधुसूदने तोषितेतत्रजायन्तेनराःपूर्णमनोरथाः अरोगा

रामः
१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तुविनो मोन्मयोन्मारोग्रनिलनमों नवेवांशाङ्गोनैवस्पर्शितामिवारकाः। महारोगादिकं वाधिपापकार्यं न जा
यते। अथाहं तानि कुलस्य चक्राणि नाडुधानि मनःशुक्र निसकलापत्रोयेन विद्युत्कान्तिनः॥ ॥ पाशाम्बडवाव॥
अनाशषितमोविन्दायेन दुःखमाजिनः। तेषां दुःखाभिभूतानां फलं पंचदशार्थमिः। पञ्चवङ्गिः सर्वभूतस्य
वासुदेवस्य हाकुने। सम देहि मेरि शिशेशं नमम भूतेशेवनः॥ ॥ उदरस्पर्शवाव॥ ॐ नमः परमार्थाय पुरुषा
यमहात्मने। अनूपवर्णरूपाय व्यापिने परमात्मने। निष्कलाय सुशुद्धाय सर्वपापहराय च। नमस्कृत्वा
प्रवक्ष्यामि यत्तत्सिद्ध्यतु मे वचः। ॐ वराहनरसिंहाय वामनाय महात्मने। नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतु मे वचः॥ ७
त्रिविक्रमाय रामाय वैकुण्ठाय नराय च। नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतु मे वचः। वराहनरसिंहेश वामनेश त्रिविक्र
म। हयग्रीवेश सर्वेश हृषीकेश हराशुभम्। अपराजितस्य चक्राद्यैश्चतुर्भिः परमायुधैः। अखण्डितानुभावैस्त्वं सर्वदुःखहरो भव॥
हरामुकस्य दुरितं दुष्कृतं दुरुपोषितम्। मृत्युबन्धार्तिभयदं दुरिष्टस्य च यत्फलम्। पराभिध्यानसहितैः प्रयुक्तं चाभिचारकम्।
गरस्पर्शमहारोगप्रयोगं जरया जर। ॐ नमो वासुदेवाय नमः कृष्णाय शार्ङ्गिणे। नमः पुष्करनेत्राय केशवायादिचक्रिणे। नमः कमलकि
ञ्जल्कपीतनिर्मलवाससे। महाहवरिपुस्कन्धघृष्टचक्राय चक्रिणे। ॐ नमो दंष्ट्रोद्धृतक्षितिभृते त्रयीमूर्तिमते नमः। महायज्ञवराहाय शेषभोगो
पशायिने। तप्तहाटककेशान्तज्वलत्पावकलोचन। वज्राधिकनखस्पर्श दिव्यसिंह नमोऽस्तु ते। काश्यपायातिह्रस्वाय ऋग्यजुःसामभूषि
ताय। तुभ्यं वामनरूपाय क्रमते गां नमो नमः। वाराहाशेषदुष्टानि सर्वपापफलानि वै। मर्द मर्द महादंष्ट्र मर्द मर्द च तत्फलम्। नरसिंह कराला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अपमार्जनम्
२

स्यदनप्रोन्मानलोज्वलाभ्रमज्ञामन्त्रनिनादेनदुष्टान्वसार्निनाशन ॥ ॥ अस्य दुःखामयानामिमितोग्यैर्मन्त्रपूतः ॥ प्रशमं सर्वदुःखानि नयत्वस्य ज
नार्दनः ॥ ऐकाहिकं द्व्याहिकं च तथा त्रिदिवसं ज्वरम् । चातुर्थिकं तथात्युग्रं तथैव सततज्वरम् ॥ ॥ दोषोत्थं सन्निपातोत्थं तथैवागन्तुकं ज्वरम् । शमं न
याशु गोविन्द छिन्द्धि छिन्द्ध्यस्य वेदनाम् ॥ ॥ नेत्रदुःखं शिरोदुःखं दुःखं चोदरसम्भवम् । अनुच्छ्वासं महाश्वासं परितापं सवेपथुम् ॥ ॥ गुदघ्राणां
घ्रिरोगांश्च कुष्ठरोगांस्तथा क्षयम् । कामलादींस्तथा रोगान्प्रमेहांश्चातिदुर्जयान् ॥ भगन्दरातिसारांश्च मुखरोगांश्च वल्गुलिम् । अश्मरीं मूत्रकृ
च्छ्रांश्च रोगानन्यांश्च दारुणान् ॥ ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः । कफोद्भवाश्च ये केचिद्ये चान्ये सान्निपातिकाः ॥ ॥ आगन्तवश्च ये रोगा लूता
विस्फोटकादयः । ते सर्वे प्रशमं यान्तु वासुदेवापमार्जिताः ॥ ३७ ॥ विलयं यान्तु ते सर्वे विष्णोरुच्चारणेन च । क्षयं गच्छन्तु चाशेषास्ते चक्राभिहता हरेः ॥
अच्युतानन्तगोविन्दनामोच्चारणभीषिताः । नश्यन्तु सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥ ३९ ॥ स्थावरं जङ्गमं वापि कृत्रिमं वा
पि यद्विषम् । दन्तोद्भवं नखभवमाकाशप्रभवं विषम् ॥ ४० ॥ भूतादिप्रभवं यच्च विषमत्यन्तदुःखदम् । शमं नयतु तत्सर्वं कीर्ति
तोस्य जनार्दनः ॥ ग्रहान्प्रेतग्रहांश्चैव तथा वै डाकिनीग्रहान् । वेतालांश्च पिशाचांश्च गन्धर्वान्यक्षराक्षसान् ॥ ४१ ॥ शकुनी
पूतनाद्यांश्च तथा वैनायकान्ग्रहान् । मुखमण्डिकां तथा क्रूरां रेवतीं वृद्धरेवतीम् ॥ ४२ ॥ वृद्धिकाख्यान्ग्रहांश्चोग्रांस्तथा मातृ
ग्रहानपि । बालस्य विष्णोश्चरितं हन्तु बालग्रहानिमान् ॥ ४३ ॥ वृद्धानां ये ग्रहाः केचिद्ये च बालग्रहाः क्वचित् । नरसिंहस्य ते दृष्ट्या द
ग्धा ये चापि यौवने ॥ ४४ ॥ सटाकरालवदनो नरसिंहो महारवः । ग्रहानशेषान्निःशेषान्करोतु जगतो हितम् ॥ ४५ ॥ नरसिंह महा

राम
२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिंहज्वालामालोज्ज्वलाननश्चाग्रहानशेषान्सर्वांश्च खादरखादाग्निलोचना।५३। येरोगा ये महोत्पाता यद्विषं ये म
हाग्रहाः। यानि च क्रूरभूतानि ग्रहपीडाश्च दारुणाः। शस्त्रक्षते च ये दोषा ज्वालागर्दभकादयः। तानि सर्वाणि स
र्वात्मा परमात्मा जनार्दनः। किंचिद्रूपं समास्थाय वासुदेवास्य नाशय। क्षिप्त्वा सुदर्शनं चक्रं ज्वालामालातिभीष
णम्।५४। सर्वदुष्टोपशमनं कुरु देववराच्युत। सुदर्शन महाज्वाल छिन्धि छिन्धि महारव। सर्वदुष्टानि रक्षांसि क्षय
यान्तु विभीषण। प्राच्यां प्रतीच्यां च दिशि दक्षिणोत्तरतस्तथा। रक्षां करोतु सर्वात्मा नरसिंहः स्वगर्जितैः। भूम्यन्तरि
क्षे च तथा पार्श्वतः पृष्ठतोग्रतः। रक्षां करोतु भगवान् बहुरूपी जनार्दनः। यथा विष्णुर्जगत्सर्वं सदेवासुरमानु
षम्। तेन सत्येन दुष्टानि शममस्य व्रजन्तु वै। यथा विष्णौ स्मृते सद्यः संक्षयं यान्ति पातकम्।५५। सत्येन तेन सकलं दुष्ट
मस्य प्रशाम्यतु। परमात्मा यथा विष्णुर्वेदान्तेष्वभिगीयते। तेन सत्येन सकलं यन्मयोक्तं तथास्तु तत्। शान्तिरस्तु शिवं चा
स्तु प्रणाशं यातु चाशिवं।५६। वासुदेवशरीरोत्थैः कुशैर्निर्मार्जितं मया। अपमार्जतु गोविन्दो नरो नारायणस्तथा।
तथास्तु सर्वदुःखानां प्रशमो वचनाद्धरेः। शान्ताः समस्ता रोगास्ते ग्रहाः सर्वे विषाणि च। भूतानि च प्रशाम्यन्तु संस्मृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नं० ४३२५ अपमार्जनम्।

तेमधुसूदनेन ॥ स्वस्थममलो रोगैर्मुक्तस्तत्क्षणमेव सः ॥ अपमार्जनकं शस्तं विष्णुनामाभिमन्त्रितम् ॥ ८८ ॥ एतत्कुशावि
ष्णुरीस्मृता जनार्दनोहं त्वयमेव वागतः ॥ हतम्मया दुष्टमशेषमस्य स्वस्थो भवत्वेष यथा हरेः ॥ ८९ ॥ शा
न्तिः स्तुतिरस्त्वास्तु दुष्टमस्य प्रशाम्यतु ॥ यदस्य दुरितं किञ्चित्क्षिप्तं लवणाम्भसि ॥ ९० ॥ त्वाकाश्यमस्तु सर्वदेवानां तु
हृषीकेशस्य कीर्तनात् ॥ यतस्ततागतं पापं तत्रैव प्रतिगच्छतु ॥ ९१ ॥ रुग्णरोगादिपीडासु जन्तूनां हितमिच्छता ॥
विष्णुभक्तेन कर्तव्यमपमार्जनकं सदा ॥ ९२ ॥ अनेन सर्वदुःखानि विलयं यान्ति शर्मशः ॥ सर्वभूतहितार्थाय कुर्या
त्तस्मात्सदैव हि ॥ ९३ ॥ ॥ ॥ इति विष्णुधर्मोत्तरे सर्वबाधाप्रशमनमष्टाविंशतितमोध्यायः ॥ ॥
१७६१ शाके धृतुमुनि लोमि पुतिते शाके पुस्तके ॥ गौरीदत्तेन लिखितमपमार्जनपुस्तकम् ॥ १ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री ५ को सरकार

नं० ४३२७

गायत्रीहृदयम्

व्यासनिर्मित ८।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गा·हृ· श्रीगणेशायनमः॥ ॥नारदउवाच॥भगवन्देवदेवेशभूतभव्यज
१ गत्प्रभो॥कवचंचश्रुतंदिव्यंगायत्रीमंत्रविग्रहम्॥१॥अधुनाश्रो
तुमिच्छामिगायत्रीहृदयंपरम्॥यद्धारणाद्भवेत्पुण्यंगायत्रीजप
तोऽखिलम्॥२॥नारायणउवाच॥देव्याश्चहृदयंप्रोक्तंनारदापर्व
तोत्कटम्॥तदेवाहंप्रवक्ष्यामिरहस्यातिरहस्यकम्॥३॥विराड्रू
पांमहादेवींगायत्रींवेदमातरम्॥ध्यात्वातस्यातथांगेषुध्यायेदे रामः
ताश्चदेवताः॥४॥पिंडब्रह्मांडयोरैक्याद्भावयेत्स्वतनौतथा॥दे १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

